# shrImajjagadgurusha NkarabhagavatpUjyapAdAchAryastavaH

# શ્રીમજ્જગદ્ગુરુશઙ્કરભગવત્પૂજ્યપાદાચાર્યસ્તવઃ

## Document Information

Text title : majjagadgurushaMkarabhagavatpUjyapAdAchAryastavaH

File name : shankaracharyastava.itx

Category : deities_misc, stotra, gurudev

Location : doc_deities_misc

Author : bhAratItIrthamahAsvAmi

Transliterated by : Ramakrishna Upadrasta uramakrishna at gmail.com

Proofread by : Sunder Hattangadi.com Ramakrishna Upadrasta

Latest update : May 18, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીમજ્જગદ્ગુરુશઙ્કરભગવત્પૂજ્યપાદાચાર્યસ્તવઃ

ૐ શ્રી ગુરુભ્યો નમઃ ।

મુદા કરેણ પુસ્તકં દધાનમીશરૂપિણં
તથાઽપરેણ મુદ્રિકાં નમત્તમોવિનાશિનીમ્ ।
કુસુમ્ભવાસસાવૃતં વિભૂતિભાસિફાલકં
નતાઘનાશને રતં નમામિ શઙ્કરં ગુરુમ્ ॥ ૧॥

પરાશરાત્મજપ્રિયં પવિત્રિતક્ષમાતલં
પુરાણસારવેદિનં સનન્દનાદિસેવિતમ્ ।
પ્રસન્નવક્ત્રપઙ્કજં પ્રપન્નલોકરક્ષકં
પ્રકાશિતાદ્વિતીયતત્ત્વમાશ્રયામિ દેશિકમ્ ॥ ૨॥

સુધાંશુશેખરાર્ચકં સુધીન્દ્રસેવ્યપાદુકં
સુતાદિમોહનાશકં સુશાન્તિદાન્તિદાયકમ્ ।
સમસ્તવેદપારગં સહસ્રસૂર્યભાસુરં
સમાહિતાખિલેન્દ્રિયં સદા ભજામિ શઙ્કરમ્ ॥ ૩॥

યમીન્દ્રચક્રવર્તિનં યમાદિયોગવેદિનં
યથાર્થતત્ત્વબોધકં યમાન્તકાત્મજાર્ચકમ્ ।
યમેવ મુક્તિકાઙ્ક્ષયા સમાશ્રયન્તિ સજ્જના
નમામ્યહં સદા ગુરું તમેવ શઙ્કરાભિધમ્ ॥ ૪॥

સ્વબાલ્ય એવ નિર્ભરં ય આત્મનો દયાલુતાં
દરિદ્રવિપ્રમન્દિરે સુવર્ણવૃષ્ટિમાનયન્ ।
પ્રદર્શ્ય વિસ્મયામ્બુધૌ ન્યમજ્જયત્ સમાન્ જનાન્
સ એવ શઙ્કરઃ સદા જગદ્ગુરુર્ગતિર્મમ ॥ ૫॥

યદીયપુણ્યજન્મના પ્રસિદ્ધિમાપ કાલટી
યદીયશિષ્યતાં વ્રજન્ સ તોટકોઽપિ પપ્રથે ।

ય એવ સર્વદેહિનાં વિમુક્તિમાર્ગદર્શકો
નરાકૃતિં સદાશિવં તમાશ્રયામિ સદ્ગુરુમ્ ॥ ૬॥

સનાતનસ્ય વર્ત્મનઃ સદૈવ પાલનાય યઃ
ચતુર્દિશાસુ સન્મઠાન્ ચકાર લોકવિશ્રુતાન્ ।
વિભાણ્ડકાત્મજાશ્રમાદિસુસ્થલેષુ પાવનાન્
તમેવ લોકશઙ્કરં નમામિ શઙ્કરં ગુરુમ્ ॥ ૭॥

યદીયહસ્તવારિજાતસુપ્રતિષ્ઠિતા સતી
પ્રસિદ્ધશૃઙ્ગભૂધરે સદા પ્રશાન્તિભાસુરે ।
સ્વભક્તપાલનવ્રતા વિરાજતે હિ શારદા
સ શઙ્કરઃ કૃપાનિધિઃ કરોતુ મામનેનસમ્ ॥ ૮॥

ઇમં સ્તવં જગદ્ગુરોર્ગુણાનુવર્ણનાત્મકં
સમાદરેણ યઃ પઠેદનન્યભક્તિસંયુતઃ ।
સમાપ્નુયાત્ સમીહિતં મનોરથં નરોઽચિરાત્
દયાનિધેઃ સ શઙ્કરસ્ય સદ્ગુરોઃ પ્રસાદતઃ ॥ ૯॥

ઇતિ શ્રીભારતીતીર્થમહાસ્વામિભિઃ વિરચિતમ્
શઙ્કરભગવત્પૂજ્યપાદાચાર્યસ્તવઃ સમ્પૂર્ણમ્ ॥

Encoded by Ramakrishna Upadrasta uramakrishna at gmail.com
Proofread by Ramakrishna Upadrasta, Sunder Hattangadi

*shrImajjagadgurusha NkarabhagavatpUjyapAdAchAryastavaH*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*